# Grammatical Analysis of Mundaka Upanisad

Swamini Nigamananda, Porbandar, Gujarat



**Published by :**

**Arsha Avinash Foundation**
**104 Third Street, Tatabad, Coimbatore 641012, India**
**Phone: +91 9487373635**
**E mail: arshaavinash@gmail.com**
**www.arshaavinash.in**

Download from www.arshaavinash.in

# मुण्डकोपनिषद्

ॐ भद्रं कर्णेभिःशृणुयाम देवाः

भद्रं पश्येमाक्षभिर्यजत्राः ।

स्थिरैरङ्गैःस्तुष्टवांसस्तनुभिः

व्यशेम देवहितं यदायुः ॥

स्वस्ति न इन्द्रो वृद्धश्रवाः

स्वस्ति नः पूषा विश्ववेदाः ।

स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः

स्वस्ति नो बृहस्पतिर्दधातु ॥ ॥

अन्वय :

हे देवा । (वयं ) कर्णेभिः भद्रं शृणुयाम, हे यजत्राः, (वयं) अक्षभिः भद्रं पश्येम,
(वयं),तुष्टुवांसः(स्तुवन्तः), स्थिरैः अङ्गैः तनुभिः,यत् आयुः,देवहितं व्यशेम(प्राप्नुयाम)।
वृद्धश्रवा इन्द्रः, नः(अस्मभ्यं) स्वस्ति (दधातु),विश्ववेदाः पूषा (सूर्यः), नः (अस्मभ्यं) , स्वस्ति (दधातु)
तार्क्ष्यः अरिष्टनेमिः (गरुडः), नः (अस्मभ्यं), स्वस्ति (दधातु),बृहस्पतिः, नः (अस्मभ्यं ) ,स्वस्ति (दधातु)।

भद्रम्…………………(ad.)
(भन्द्-रक्) भन्द्-to make fortunate 1A set
auspicious

कर्णेभिः……………..कर्णः(M.)instru.pl. (छान्दसम्)
आकर्ण्यते अनेन--कर्ण कर्ण्--to hear 10U
with the help of ear

शृणुयाम……………..श्रु 1st per.pl.(pot.mood) विधि-लिङ्
श्रु-to hear 1PP anit (In active voice it goes into 5th conj.) श्रु शृवः च। ३.४.१९३
may we hear

देवाः…………… ….देवः(M.)nom.pl.
(दिव्-अच्) दिव्-to shine 4p
O, effulgents

पश्येम…………….. दृश् 1st per.pl. (pot.mood) विधि-लिङ्
दृश्--to see 1P Anit
may we see

अक्षभिः…………….अक्षन् (N.) inst.pl.
अक्ष्--to see 10U
with the help of eyes



Download from www.arshaavinash.in

यजत्राः..................यजत्रः(M.)voc.pl.
यजत्रं त्रायते --यजत्रः
O,protectors of rituals
स्थिरैः...................(ad.) स्थिरः(M.) instr.pl.
(स्था-किरच् ) स्था--to stand 1P
with healthy
अङ्गैः....................अङ्गम्(N.)instr.pl.
(अङ्ग्--अच् ) अङ्ग्-to go 10P
with limbs
तुष्टुवांसः................(ad.) तुष्टुवस्(M.)nom.pl.
(स्तु-स्तु-कसु ) स्तु-to praise 2P
while praising
तनूभिः..................तनू(F.)instr.pl.
(तन्--उ) तन्-to spread 8U
by the bodies
व्यशेम................. वि-विश् 1st .per.pl.po.mood विधि-लिङ्ग (छान्दसम्)
वि-विश्-to enter 6P anit
may we enjoy
देवहितम्...............(ad.) देवहितम्(N.)acc.sing.
देवानां हितम्--देवहितम्(6TP)
(दिव्-अच्) (धा-क्त)
beneficial to the Gods
यत्......................(Re.pro.) यत्(N.)acc.sing.
that
आयुः...................आयुस्(N.)acc.sing.
(आ-इ-उस् ) इ-to go 2P
a life
स्वस्ति...................indeclinable
auspicious
नः.......................(per.pro.) अस्मद् dat.pl. second form of अस्मभ्यम्
(अस्--मदिक्) अस्- to be 2P set
to us
इन्द्रः....................इन्द्रः(M.) nom.sing.
इन्दति इति इन्द्रः
(इन्द्-रन्) इदि-to have great power 1P
one who has a great power
वृद्धश्रवाः...............(ad.) वृद्धश्रवस् (M.)nom.sing.
वृद्धः श्रवसःयस्य सः(BV.)



Download from www.arshaavinash.in

(वृद्ध-क्त) (श्रु-असि)
one whose fame is well known

पूषा…………………पूषन् (M.)nom.sing.
(पूष्--कनिन्) पूष्--to nurture 4P
The sun

विश्ववेदाः……………(ad.) विश्ववेदस् (M.)nom.sing.
विश्वं सर्वं जानाति वेत्ति -उप.तत्पु.
one who knows everything

तार्क्ष्यः………………तार्क्ष्यः(M.)nom.sing.
(तृक्ष-अण्=तार्क्ष-ष्यञ्) तृक्ष्-to go 1P
Garuda

अरिष्टनेमिः………… (ad.) अरिष्टनेमिः(M.)nom.sing.
अरिष्यत् अकुण्ठित् गतिः यस्य(BV)
unobstructed movement

बृहस्पतिः……………..बृहस्पतिः(M.) nom.sing.
(बृहतः वाचः पतिः)
Guru of the Gods

दधातु…………………धा 3rd per.sing. (Imper.mood) लोट्
धा--to grant 3U Anit
may you grant

## प्रथमः खण्डः

ॐ ब्रह्मा देवानां प्रथमः सम्बभूव
विश्वस्य कर्ता भुवनस्य गोप्ता
स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठा-
मथर्वाय ज्येष्ठपुत्राय प्राह ।।१।।

●अन्वयः

विश्वस्य कर्ता(उत्पादयिता),भुवनस्य गोप्ता(पालयिता),देवानां(द्योतनवतां इन्द्रादीनां मध्ये ), ब्रह्मा(महान्धर्मज्ञानवैराग्यैश्वर्यैः परिवृढः), प्रथमः(गुणैः प्रधानः सन् अग्रे वा) सम्बभुव (स्वातन्त्र्येण अभिव्यक्तः)।सः(ब्रह्मा), सर्वविद्याप्रतिष्ठां( सर्वविद्याभिव्यक्तिहेतुत्वात् ), ब्रह्मविद्यां(परमात्मनः विद्यां),अथर्वाय ज्येठपुत्राय, प्राह(उक्तवान्, अवदत् ) ।

ब्रह्मा……………….. ब्रह्मन्(N.)nom.sing.
(बृह्--मनिन्) बृह्-to expand 1P
Bramhaji

देवानाम्…………… देवः(M.)gen.pl.
(दिव्--अच्) दिव्-to shine 4P
among the Gods

प्रथमः………………प्रथमः(M.)no.sing.
(प्रथ्- अमच्) प्रथ्- to become famous 1A,10U
first



Download from www.arshaavinash.in

सम्बभुव…………… सम्-भु 3rd per.sing.(perfect past) लिट्
सम्-भू--to be born 1P Anit
manifested

विश्वस्य……………..विश्वः (M.)gen.sing.
(विविधं प्रत्ययं गम्यम्-विश्वम्) (विश्-व) विश्-to enter 6P
of the universe

कर्ता……………….. कर्तृ (M.)nom.sing.
(कृ--तृच्) कृ-to do 8U
the creator

भूवनस्य…………….भूवनम्(N.)gen.sing.
(भू-क्युन् ) भू- to be 1P
of the world

गोप्ता………………..गोप्तृ(M.)nom.sing.
(गुप्-तृच्) गुप्- to protect 1P
the protector

सः…………………..(demo.pro.) तद् (M.)nom.sing.
He

ब्रह्मविद्याम्…………(ad.) ब्रह्मविद्या(F.) acc.sing.
ब्रह्मणः विद्या (6TP) (बृह्-मनिन्) (विद्-क्यप्-टाप्) विद्-to know 2P
knowledge of Bramhan

सर्वविद्याप्रतिष्ठाम्……..(ad.) सर्वविद्याप्रतिष्ठा(F.)acc.sing.
सर्वेषां विद्या- सर्वविद्या (6TP)वा सर्वविद्यायाः प्रतिष्ठा यस्याम् (7TP) (प्रति-स्था-अङ्-टाप्)
the basis of all knowledges

अथर्वाय…………….अथर्वन्(M.)dat.sing.
(अथ-ऋ-वनिप्)
to Athrva

ज्येष्ठपुत्राय…………….(ad.) ज्येष्ठपुत्र(M.)dat.sing.
ज्येष्ठ च असौ पुत्रः (KD) (यस्मात् पुन्नाम्नो नरकादि पितरं त्रायते- पुत्रः)
(वृध्-क्त-इष्ठन् )(युत्-त्रै-क) वृध्-to be old 1A,10U युत्-to share 1P
□ the eldest son

प्राह…………………..प्र-ब्रु 3rd per.sing. (pre.tense) लट्
ब्रु-to tell 2U set "ब्रु" root takes "आह" as an आदेश in the first five forms in the present tense.
he tells

| | | |
|---|---|---|
| आह | आहतुः | आहुः |
| आत्थ | आहथुः | |

✣✣✣✣✣✣✣✣✣✣✣✣✣✣***❀***✣✣✣✣✣✣✣✣✣✣✣✣



Download from www.arshaavinash.in

अथर्वणे यां प्रवदेत ब्रह्मा-

थर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम् ।

स भारद्वाजाय सत्यवहाय प्राह

भारद्वाजोऽङ्गिरसे परावराम् ॥२ ॥

●अन्वयः

ब्रह्मा(विश्वस्य कर्ता,भुवनस्य गोप्ता), यां (ब्रह्मविद्यां), अथर्वणे प्रवदेत(अवदत्,उक्तवान)।(सः) अथर्वा तां ब्रह्मविद्यां, पुरा(पूर्वकाले),अङ्गिरे उवाच(उक्तवान)।सः(अङ्गिरा), (तां ब्रह्मविद्यां), सत्यवहाय(सत्यवहनाम्ने) भारद्वाजाय, (उक्तवान)। (सः)भारद्वाजः, (तां ब्रह्मविद्यां), अङ्गिरसे(स्वशिष्याय पुत्राय वा),परावरां(गुरोःपरात्शिष्येण अवरेण प्राप्तः, एवं परम्परया प्राप्तम्) (उक्तवान)।

अथर्वणे................अथर्वन् (M.) dat.sing.
(अथ-ऋ-वनिप्)
to Athrvan

यां................(Rel..pro.) यत्(F.)acc.sing.
that

प्रवदेत................छान्दसम् it should be प्रवदत् -प्र-वद् 3rd per.sing. past tense लङ्
प्र-वद्- to speak clearly 1P Anit
he told clearly

ब्रह्मा...................ब्रह्मन्(N.)nom.sing.
(बृह्-मनिन्) बृह्- to expand 1P
Bramhaji

अथर्वा................अथर्वन् (M.) nom.sing.
Atharva

ताम्...................(Rel.pro.) तत् (F.)acc.sing
that

पुरा......................indeclinable
(पुरा--का)
previously

उवाच................. ब्रु 3rd per.sing. Redupl.per.past द्वित्व लिट्
ब्रु-to speak 2U set
told

अङ्गिरे................ अङ्गिर्(M.) dat.sing.
to Angira

ब्रह्मविद्याम्.............(ad.) ब्रह्मविद्या(F.)acc.sing.
(बृह्-मनिन्)(विद्-क्यन्-टाप्) ब्रह्मणः विद्या -6TP
the knowledge of Bramhan

सः.......................(Demo.pro.) तत्(M.)nom.sing.
he



Download from www.arshaavinash.in

भारद्वाजाय................भारद्वाजः(M.)dat.sing.
(भरद्वाज-अण्) भरद्वाजस्य अपत्यम्
to Bharadvaj
सत्यवहाय...............(ad.) सत्यवहः(M.)dat.sing.
सत्यं वहति इति सत्यवहः (UPTP)
to Satyavahaya

प्राह.....................प्र-ब्रु 3rd.per.sing. pre.ten. लट्
प्र-ब्रु--to tell 2U set
he tells
अङ्गिरसे...............अङ्गिरस् (M.)dat.sing.
(अङ्ग्-अस-इरुट्)
to Angirasa
परावराम्................ (ad.) परावरा(F.) acc.sing.
(परा च अवरा च- इत.द्व.)
in succession from higher to lower ones

✤✤✤✤✤✤✤✤✤✤✤✤✤✤***❀***✤✤✤✤✤✤✤✤✤✤✤✤✤

शौनको ह वै महाशालोऽङ्गिरसं
विधिवदुपसन्नः पप्रच्छ ।
कस्मिन्नु भगवो विज्ञाते
सर्वमिदं विज्ञातं भवतीति ॥३ ॥

●अन्वयः

शौनकः ह वै महाशालः(महागृहस्थः) (आसीत्)।(सः शौनकः) विधिवत्(यथाशास्त्रं), उपसन्नः(उपगतः सन्), अङ्गिरसं(भारद्वाजशिष्यं),पप्रच्छ(पृष्टवान्) ।हे भगवः(भगवन्),कस्मिन् न उ विज्ञाते(विशेषण-अवगते सति), सर्वमिदंविज्ञातं(विशेषेण-अवगतं),भवति,इति।(एकस्मिन् विज्ञाते सर्वविज्ञेयं भवति )।

शौनकः................शौनकः(M.)nom.sing.
(शुनक-अण्) शुनकस्य आपत्यम्
Saunak
ह.........................indeclinable
(हा-ड)
indeed
वै.................. .......indeclinable
(वा-डै)
indeed
महाशालः...............(ad.) महाशालः(M.)nom.sing.
महान् यागशाला यस्य सः (BV)
a great house holder



Download from www.arshaavinash.in

अङ्गिरसम्.............अङ्गिरस(M.)acc.sing
(अङ्ग्-अस-इरुट्)
to Angirasa

विधिवत्................ indeclinable
(वि-धा-कि-वत्) तेन तुल्यं क्रिया चेद्वतिः।५.१.११५
in accordance with the scriptures

उपसन्नः.................(ad.) उपसन्नः(M.) nom.sing.
(उप-सद्-क्त)
approached

प्रपच्छ.................. पृच्छ् 3rd.per.sing. Redupl.past perfect द्वित्व लिट्
पृच्छ्--to ask,to seek for 6P Anit
asked

कस्मिन्..................(Int.pro.) किम्(N.)loc.sing.
which is that

नु...................... indeclinable
represented as a doubt

भगवः..................छान्दसम् भगवन्............भगवान(M.)voc.sing.
भगः अस्य अस्ति इति तदस्यास्त्यस्मिन्निति मतुप्।५.२.९४
O,Lord !

विज्ञाते................ (ad.) विज्ञातम्(N.)loc.sing.
(वि-ज्ञा-क्त)
when it having been known

सर्वम्...................(Demo.pro.) सर्वम्(N.)nom.sing.
(सृतं अनेन -)
everything

इदम्................... (Demo.pro.) इदम्(N.)nom.sing.
this

विज्ञातम्................(ad.) विज्ञातम्(N.)nom.sing.
(वि-ज्ञा-क्त)
known

भवति...................भू 3rd.per.sing. pre.ten. लट्
भू-to be,to bcome 1Pset
becomes

इति.....................indeclinable
(इ-क्तिन्) इ-to go 2P
as represented by quotation mark



Download from www.arshaavinash.in

तस्मै स होवाच । द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च ॥४॥

●अन्वयः

सः(अङ्गिरा),तस्मै(शौनकाय)ह उवाच।ब्रह्मविदः(वेदार्थाभिज्ञाः),यत् " द्वे विद्ये वेदितव्ये " इति, ह=स्म=किल,वदन्ति।(के ते ? इत्याह)।परा(परमात्मविद्या, यया सर्वं विज्ञातं भवतीति)।अपरा च(धर्माधर्मसाधनतत्फलविषया)।

तस्मै………………. (Demo.pro.) तत् (M.)dat.sing.
to him

सः………………….. (Demo.pro.) तत् (M.)nom.sing.
he

उवाच……………… ब्रु 3rd per.sing. Redupl.per.past द्वित्व लिट्
ब्रु-to speak 2U set
told

द्वे……………………द्वि (F.)nom.dual (always in dual)
two kinds

विद्ये…………………विद्या (F.)nom.dual
(विद्-क्यप्--टाप्) विद्-to know 2P
should be known

इति………………….indeclinable
(इ-क्तिन्) इ-to go 2P
as represented by quotation mark

स्म…………………..indeclinable
indeed

यत्…………………..(Re.pro.) यत्(N.)acc.sing.
that

ब्रह्मविदः………….. ब्रह्मवित्(M.)nom.pl.
ब्रह्म वेत्ति इति-उप.तत्पु. (बृह्-मनिन्)(विद्-क)
knower of bramhan

वदन्ति……………..वद् 3rd.per.pl
वद्--to tell 1Pset
they tell

परा………………….परा(F.)nom.sing.
(पृ-अच्-टाप्) पृ-to fill up 10P
exalted,higher

अपरा……………….(ad.) अपरा(F.)nom.sing.
न परा- अपरा
inferior

एव…………………..indeclinable
(इ-वन) इ-to go 2P
also



Download from www.arshaavinash.in

✤✣✣✣✣✣✣✣✣✣✣✣✣✣✣✣✣✣✣✣✣✣✣✣✣***❀***✣✣✣✣✣✣✣✣✣✣✣✣✣✣✣✣✣✣✣✤

तत्रापरा,ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तंछन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते।५।।

●अन्वयः

तत्र (तस्मिन) अपरा विषये,ऋग्वेदः,यजुर्वेदः,सामवेदः,अथर्ववेदः,शिक्षा,कल्प, व्याकरणं, निरुक्तं,छन्दः, ज्योतिषं इति (षडाङ्गानि अपराविद्या उच्यते) |अथ,यया (पराविद्यया) तत् अक्षरं(यस्मिन् विज्ञाते सर्वं विज्ञातं -तत् ब्रह्म) अधिगम्यते,
(सा), परा (विद्या वेदितव्या)।

तत्र.....................अव्ययः
(तत्--त्रल्)
in that

अपरा...................(ad.) अपरा(F.)nom.sing.
न परा- अपरा
inferior

ऋग्वेदः..................ऋग्वेदः(M.)nom.sing.
it is in the verse form
Rg veda

यजुर्वेदः.................यजुर्वेदः(M.)nom.sinh.
it is in the prose form
Yajus veda

सामवेदः.................सामवेदः(M.)nom.sing.
While recitation five nodes of music has been used
Sama veda

अथर्ववेदः..............अथर्ववेदः(M.)nom.sing.
Atharva veda

शिक्षा.................. शिक्षा(F.)nom.sing.
(शिक्ष्-अ-टाप्) शिक्ष्-to teach 1A
science of pronunciation

कल्पः.....................कल्पः(M.)nom.sing.
(क्लृ-अच्- or घञ्) क्लृ-to be able 1A
book of rituals and its mandates

निरुक्तम्.................निरुक्तम्(N.) nom.sing.
(निर्-वच्-क्तिन्) वच्-to speak 2P
etymology of words

छन्दसम्.................छन्दसम्(N.) nom.sing.
(छन्द्- असुन्) छन्द्- to please 10U
book of different meter

ज्योतिषम्...............ज्योतिषम (N.) nom.sing.
(ज्योतिस्-अच्)
science of Astronomy and astrology



Download from www.arshaavinash.in

व्याकरणम्.............व्याकरणम्(N.) nom.sing.
व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः येन (वि-आ-कृ-ल्युट्) कृ-to do 8U
grammatical analysis

अथ.....................indeclinable
(अर्थ्-ड)
auspicious,now

यया.....................(Re.pro.) यत् (F.) instr.sing.
by which

तत्.....................(demo.pro.) तत्(N.)nom.sing.
that

अक्षरम्.................(ad.) अक्षरम् (N.)nom.sing.
न क्षरति इति- अक्षरम् (NTP)
(क्षर्--अच्) क्षर्-to destroy 1P
one who never subject to perish

अधिगम्यते.............अधि-गम् 3per.sing. (Passive constr.)
अधि-गम्- to understand 1P Anit
is understood

❈✤✤✤✤✤✤✤✤✤✤✤✤✤✤✤✤***❀***✤✤✤✤✤✤✤✤✤✤✤✤✤✤✤❈

यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः ॥६॥

●अन्वयः

यत् (वस्तु ब्रह्म),अद्रश्यं (अदृश्यं सर्वज्ञानेन्द्रिय-अगम्य),अग्राह्यं (कर्मेन्द्रिय अविषयम्), अगोत्रं(मूलं कारणं न विद्यते यस्य तत्ः),अवर्णं (द्रव्यधर्माः स्थूलत्वादयः शुक्लादयः नविद्यमानाः वर्णाः यस्य तत्),अचक्षुःश्रोत्रं (चक्षुःश्रोत्रं न विद्यते यस्य तत् ), अपाणिपादं (पाणिपादं न विद्यते यस्य तत् ),नित्यं (काल-अबाधितम्, अविनाशि ), विभुं (विविधप्राणिभेदे न भवति -), सर्वगतं (आकाशवत् व्यापकम्),सुसूक्ष्मं (शब्दादिस्थूलत्वादिगुणरहितत्वात्),अव्ययं (न व्येति इति),भूतयोनिं (स्थावरजंगमानां कारणभूतम्),धीराः, तद् (वस्तु), (यया विद्यया), परिपश्यन्ति(आत्मस्वरुपेण विजानन्ति सा परा विद्या इति अर्थः)।

अद्रेश्यम्...............छान्दसम् अदृश्यम्(ad.) अदृश्यम्(N.).nom.sing. pot.pass.part.
(न दृश्यम्-- अदृश्यम्)(NTP) (दृश्- क्यप् ) दृश्- to see 1P
can not be perceived

अग्राह्यम्................(ad.) अग्राह्यम् (N.).nom.sing. pot.pass.part.
(न ग्राह्यम् - अग्राह्यम्)(NTP) (ग्रह्-क्यप्) ग्रह्- to take 9P
can not be grasped

अगोत्रम्.................(ad.) अगोत्रम् (N.).nom.sing. pot.pass.part.
(गोत्रं न विद्यते यस्य तत् ) ( NBV)
which has no saurce



Download from www.arshaavinash.in

अवर्णम्................(ad.)    अवर्णम् (N.).nom.sing. pot.pass.part.
(अविद्यमानाः वर्णाः यस्य तत्) (NBV)
which has no features

अचक्षुःश्रोत्रम्..........(ad.)    अचक्षुःश्रोत्रम् (N.).nom.sing. pot.pass.part.
(चक्षुःश्रोत्रं  न विद्यते यस्य तत् ) (NBV)
which has no eyes & ears

अपाणिपादम्..........(ad.)    अपाणिपादम् (N.).nom.sing. pot.pass.part.
(पाणिपादं  न विद्यते  यस्य तत् )(NBV)
which has neither feet nor hands

नित्यम्.................नित्यम् (N.) nom.sing.
(नि-त्यप्)
eternal

विभुम्..................विभुम् (N.)nom.sing.
(वि-भू-डु)(विविधं भवति)
diverse forms

सर्वगतम्...............(ad.)(com.)    सर्वगतम् (N.)nom.sing.
(सृतम् अनेन विश्वम् इति विश्वम्)(गम्-क्त) (सर्वं च तत् गतं च- सर्वगतम् )KD
all pervasive

सुसूक्ष्मम्...............(ad.)    सुसूक्ष्मम् (N.)nom.sing.
(सुष्ठु सूक्ष्मम्-  )
extremely subtle

अव्ययम्...............(ad.)    अव्ययम् (N.)nom.sing.
(न व्ययम् - NTP)
which is not subject to diminish

भूतयोनिम्.............(ad.)    भूतयोनिम्  (N.)nom.sing.
(भूतानाम् योनिम् - 6TP) (भु-क्त) (यु-नि)    यु-to join 2P
source  of all beings

परिपश्यन्ति............परि-दृश् 3rd.per.pl.  pre.ten.  लट्
परि-दृश्- to see as it is    1PP Anit
they realize

धीराः....................धीरः (M.)nom.pl.
(धी-रा-क)
the wise men

A Bramahan, which can't be percieved by all sense-organs,which is not object of organ of action, which doesn't have cause(for its existance), which doesn't have any features like grossness, whiteness, which doesn't have eyes and ears,which doesn't have  hands and feet, which is  not bound by time being eternal, which assumes all diverse forms, which is all pervading like space, which is extremely subtle being bereft of grossness starting from sound(which is quality of space),which doesn't undergo any change, which is the



Download from www.arshaavinash.in

source of all movable and unmovable beings.By which knowledge, the wise men see that Bramhan as nondifferent from them, that is Para-vidya.

✤✤✤✤✤✤✤✤✤✤✤✤✤✤✤✤✤***❀***✤✤✤✤✤✤✤✤✤✤✤✤✤✤

यथोर्णनाभिः सृजते गृह्णते च
यथा पृथिव्यामोषधयः सम्भवन्ति ।
यथा सतः पुरुषात्केशलोमानि
तथाक्षरात्सम्भवतीह विश्वम् ॥७॥

ॠअन्वयः

यथा(येन प्रकारेण), उर्णनाभिः(लूताकीटः, अन्यत् कारणं अनपेक्ष्य, तन्तून् )सृजते(सृजति), (तान् एव) गृह्णते(गृह्णाति, स्वस्मिन् उपसंहरति)।यथा(येन प्रकारेण), पृथिव्यां,ओषधयः(वीह्यादिः),(स्वात्मा अव्यतिरिक्ताः एव) सम्भवन्ति(प्रभवन्ति)।यथा(येन प्रकारेण), सतः(जीवतः) पुरुषात्(मनुष्यात्), (अचेतनानि)केशलोमानि,(प्रभवन्ति)।तथा(तद्वत्), अक्षरात् (ब्रह्मणात्), इह(संसारमण्डले), विश्वं (प्रभवति)।

यथा.....................indeclinable
(यत्-थाल्)
as

उर्णनाभिः..............उर्णनाभिः (M.) nom.sing.
उर्णमूसूत्रं नाभौ गर्भे यस्य सः
a spider

सृजते..................छान्दसम्- सृजति सृज् 3rd.per.sing.pre.ten.लट्
सृज्- to create 6P Anit
contextually-to spread out

गृह्णते....................छान्दसम्-गृह्णाते ग्रह्- 3rd.per.sing. pre.ten.लट्
ग्रह्- to take hold of 9U Anit
withdraws

पृथिव्याम्..............पृथिवी (F.) loc.sing.
(प्रथ्- षिवन्-स्म्प्रसारणम्) प्रथ्-to become famous 1A,10U
on the earth

ओषधयः..............ओषधिः (F.)nom.pl.
(उष् - घञ्)(ओष्-धा-कि स्त्रीयां ङीष्) उष्-to burn 1P
wide ranging plants to trees

सम्भवन्ति.............सम्-भू 3rd.per.pl. pre.ten लट्
सम्-भू- to be born 1P Anit
manifest

सतः....................(ad.) (pr.act.part.) सत् (N.)alb. sing.
(अस्-शतृ) अस्-to be 2P
from being



Download from www.arshaavinash.in

पुरुषात्.................पुरुषः (M.) alb. sing.
पुरि देहे शेते इति पुरुषः (पुर्-कुषन्) पुर्- to fill 4A,10U
from human being

केशलोमानि............(ad.) केशलोमन् (N.)..nom.pl.
केशाः च लोमानि च- केशलोमानि (द्वन्द स.) (लु-मनिन्)(क्लिश्-अन्)
hair on the body and head

तथा.....................indeclinable
(तत्--थाल्)
so to

अक्षरात्.................(ad.) अक्षरम् (N.)alb. sing.
(न क्षरति-इति अक्षरम् ) ((NTP)
out of whom one who is not subject to perish

इह.......................indeclinable
(इदम्-ह इशादेशः)
this

विश्वम्..................(ad.) विश्वम् (N.)nom.sing.
(विश्-व) विश्- to enter 6P
the universe

As a spider without expecting other source its threads spreads out and withdraws them also.As on the mother Earth come out herbs not other than one's own self.As insentient hair (on the head & body) are come from sentient human being. So out of Imperishable the universe is born. (as though).

***********************************

तपसा चीयते ब्रह्म ततोऽन्नमभिजायते ।
अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतम् ॥८॥

ॠअन्वयः

ॠब्रह्म तपसा चीयते ।ब्रह्म (अक्षराख्यं), तपसा (सर्वज्ञतया, सृष्टिस्थितिसंहारशक्तिविज्ञानतया),चीयते(बहु स्यां बहु प्रभूतं स्यां भवेयम्)।ॠततः अन्नं अभिजायते।ततः(ब्रह्मणः), अन्नं (अव्याकृतं ईश्वरोपाधिभूतम्), अभिजायते।ॠअन्नात् प्राणः (अभिजायते)। अन्नात् (ईश्वरात् अव्याकृतात् ),प्राणः(हिरण्यगर्भः)(अभिजायते)।ॠप्राणात्(हिरण्यगर्भात् ),मनः(समष्टिसंकल्पविकल्पात्मकं अभिजायते )।ॠमनसः(समष्टिसंकल्पविकल्पात्मकात् ), सत्यं (स्थूलभूतपञ्चकं अभिजायते)।ॠसत्यात् (स्थूलभूतपञ्चकात्,लोकाः (भूः आदयः सप्तः अभिजायते )।ॠ(तेषु लोकेषु मनुष्यादि क्रमेण कर्माणि अभिजायन्ते )।ॠकर्मसु (उक्तकर्मभ्यः)च अमृतं (कर्मफलं -कर्माणि अवश्यंभावित्वात्-अमृतम् अभिजायते)।

तपसा..................तपस् (N.)instr.sing.(इत्थं भूते तृतीया)
(तप्-असुन्) तप्-to be powerful 4A
because of all knowing power

चीयते..................ची 1st.per.sing. passive
ची- to collect 5U Anit
expands



Download from www.arshaavinash.in

ब्रह्म…………………ब्रह्म (N.)nom.sing.
(बृह्-मनिन्) बृह्-to grow 1P
Brahman

ततः…………………indeclinable
(तत्-तसिल् पञ्चम्यार्थे )
from that

अन्नम्………………अन्नम् (N.)nom.sing.
(अद्-क्त) अद्-to eat 2p
food, contextually- unmanifest

अभिजायते…………अभि-जन् 3rd.per.sing. pre.ten.लट्
अभि-जन्-to be born.4A set ज्ञाजनोःजा।७.३.७९
is being born

अन्नात्………………अन्नम् (N.)nom.sing.
(अद्-क्त) अद्-to eat 2p
contextually- from unmanifest

प्राणः…………………प्राणः (M.)nom.sing.
(प्र-अन्-घञ्) अन्-to breathe 2P
Hiranya-Grabha

मनः…………………मनस् (N.)nom.sing.
(मन्-असुन्) मन्-to think 4A
Total Mind

सत्यम्………………(ad.) सत्यम् (N.)nom.sing.
(सत्-यत् )
gross five elements

लोकाः………………लोकाः (M.)nom.pl.
(लोक्-घञ्) लोक्-to experience 4A
worlds

कर्मसु………………कर्मन् (N.)loc.pl. विषय सप्तमी
(कृ-मनिन्) कृ- to do 8U
with reference to Karmas

अमृतम्………………(ad.) अमृतम् (N.)nom.sing.
न मृतम् - अमृतम् (नञ् तत्पु.) (मृ-क्त) मृ-to die 4A
contextually-Result of Karmas

Bramhan becomes many becauce of omniscience power.From Bramhan, Isvara by the name unmanifest is born.From Isvara, Hianya-Grabha is born.From Hirnya-Garbha cosmic (total)mind is born.From cosmic mind, five gross elements are born.From five elements worlds like Bhu,Bhuvah...etc. are born. In those worlds, human beings and Karmas are born successively.And from those Karmas results are being born. And because of the nature of definitely result; its called immortal.



Download from www.arshaavinash.in

꧁✣✣✣✣✣✣✣✣✣✣✣✣✣✣***❀***✣✣✣✣✣✣✣✣✣✣✣✣✣✣꧂

यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः ।
तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते ॥ ९ ॥

•अन्वयः

यः (अक्षराख्यः), सर्वज्ञः (व्यष्टिरुपेण-अविद्याख्ये ना-उपाधिना विशेषणरुपेण जानाति इति ),सर्ववित्, (समष्टिरुपेण मायाख्ये-नोपाधिना सर्वं जानाति इति)।यस्य(अक्षरस्य), ज्ञानमयं तपः(सार्वज्ञ्यलक्षणं तपः, न तु आयासलक्षणं ),(अस्ति)। तस्मात् (ज्ञानमयात् तपसः),एतद् ब्रह्म (उक्तं हिरण्यगर्भाख्यं), नाम(देवदत्तः-इत्यादि),रुपम्(शुक्लं, नीलमित्यादि), अन्नं च(व्रीहियवादि ),जायते (अभिव्यज्ञते) ।

यः......................(re.pro.) यत् (M.)nom.sing.
one who

सर्वज्ञः..................(ad.) सर्वज्ञः (N.) nom.sing.
(सर्वं जानाति इति सर्वज्ञः) (उपपद तत्पु.)
one who knows in general (contextually)

सर्ववित्................(ad.) सर्ववित्(M.)nom.sing.
(सर्वं वेत्ति- सर्ववित् ) (उपपद तत्पु.)
one who knows in detail

यस्य....................(re.pro.) यत् (M.)gen.sing.
one whose

ज्ञानमयम्..............(ad.) ज्ञानमयम् (N.)nom.sing.
(ज्ञा-ल्युट्-मयट्) (मयट्-प्राचुरार्थे) ज्ञा-to know 9P
in the form of knowledge

तपः....................तपस् (N.)nom.sing.
(तप्-असुन्) तप्-to be powerful 4A
austerity

तस्मात्.................(re.pro.) तत् (N.)alb. sing.
from that

एतद्...................(demo.pro.) एतत् (N.)nom.sing.
this

ब्रह्म...................ब्रह्म (N.) nom.sing.
Brahman

नामरुपम्...............(ad.) नामरुपम् (N.) nom.sing.
(नाम च रुपं च-नामरुपम्)(समाहार द्वन्द्व)
(म्ना-मनिन् )(अभिधीयते अर्थः अनेन-नाम) म्ना-to learn 1P
(रुप्-क or भावे अच् ) रुप्- to form 10U
name and form



Download from www.arshaavinash.in

अन्नम्………………अन्नम् (N.) nom.sing.
(अद्-क्त) अद्—to eat 2P
food
जायते………………जन् $3^{rd}$.per.sing. pre.ten.लट्
जन्- to be born 4A set
is manifested
One who knows everything because of adjacent of Maya at totality level, one who knows specifically because of adjacent of ignorance at body-mind-sense complex level.One whose austerity is only in the form of the knowledge.Because that knowledge this Hiranya-Garbha, name such as Devdatta etc., quality such as blue, white etc. and food such as paddy, barley are manifested.

## इति मुण्डकोपनिषदि प्रथममुण्डके प्रथमः खण्डः

### द्वितीय खण्डः

तदेतत्सत्यं मन्त्रेषु कर्माणि कवयोः यान्यपश्यंस्तानि त्रेतायां बहुधा सन्ततानि । तान्याचरथ नियतं सत्यकामा एष वः पन्थाः सुकृतस्य लोके ॥ १ ॥

• अन्वयः

कवयः(मेधाविनः), यानि कर्माणि(अग्निहोत्रादीनि), मन्त्रेषु (ऋगादिवेदेषु), अपश्यन्,तानि(वेदविहितानि कर्माणि), त्रेतायां (वेदत्रये त्रेतायुगे वा),बहुधा सन्ततानि(विस्तृतानि)।तत् एतत् सत्यं (फल-अव्यभिचारि)।(अतः), यूयं ,तानि नियतं (वेदविहितानि कर्माणि),आचरथ।सत्यकामाः (कर्मफल- इच्छावन्तः ),सुकृतस्य (स्वयंकृतस्य ),लोके (फलनिमित्तं ोक्यते,भुज्यते,दृश्यते-लोकम्), वः(युष्माकम्), एषः पन्थाः(मार्गःअवश्यफलप्राप्तिसाधनम् )।

तत्…………………(demo.pro.) तत्(N.)nom.sing.
that
एतद्……………….(demo.pro.) एतत् (N.)nom.sing.
this
सत्यम्………………(ad.) सत्यम् (N.)nom.sing.
(सत्-यत् )
contextually- the result of Karma
मन्त्रेषु………………मन्त्रः(M.)loc.pl.
(मन्त्र्- अच् ) मन्त्र्-to consult 10A
in the hymns (of Vedas)
कर्माणि………………कर्मन् (N.)acc.pl.
(कृ-मनिन्) कृ- to do 8U
to Karmas
कवयः………………कविः (M.)nom.pl.
(कु-इ )
the wise men



Download from www.arshaavinash.in

यानि………………(re.pro.) यत् (N.)acc.pl.
those which
अपश्यन्……………दृश्- 3rd.per.pl. past ten. लङ्
दृश्- to see 1P Anit
they saw
तानि………………(re.pro.) तत् (N.)acc.pl.
those which
त्रेतायाम्……………त्रेता(F.)loc.sing.
त्रीन् भेदान् प्राप्नोति….त्रेता
three Vedic duties
बहुधा………………indeclinable
(बहु-धाच्)
variously
सन्ततानि……………(ad.) सन्ततम् (N.) nom.pl.
(सम्-तन्-क्त) तन्- to spread 8Uअनुदात्त-उपदेश-वनति-तनोत्यादिनां अनुनासिकः लोपः झलि-क्ङिति। ६-४-३७
are spreaded
आचरथ……………आ-चर् 2rd.per.pl. pre.ten. लट्
आ-चर् -to perform 1P Set
you all
नियतम्……………(ad.) नियतम् (N.) acc.sung.
(नि-यम्-क्त ) यम्-to restrain 1Aअनुदात्त-उपदेश-वनति-तनोत्यादिनां अनुनासिकः लोपः झलि-क्ङिति। ६-४-३७
for ever
सत्यकामाः…………(ad.) सत्यकामाः (M.)nom.pl.
………………
desire for the true results
एषः…………………(demo.pro.) एतत् (M.)nom.sing.
this
वः……………………(per.pro.) shorter form युष्माकम् युष्मद् gen.pl.
for us
पन्थाः………………पथिन् (M.) nom.sing.
(पथ आधारे इनि )
a path
सुकृतस्य……………(ad.) सुकृतम् (N.) gen.sing.
(सुष्ठु कृतम्- )
acquired Karma
लोके…………………लोकः(M.) loc.sing.(निमित्त सप्तमी)(4th. case is used in 7th case)
(लोक्यते इति- लोकः) लोकः = कर्मफल
for the result of Karma



Download from www.arshaavinash.in

The wise men saw Karmas like Agnihotra and etc. in the Rgveda and etc.Those all Karmas which enjoined by Vedas are well spread in all three vedas or well mentioned in three periods of time.The result of these Karmas are definitely there.You perform those Karmas who are desirous of the result.This path is the mean of getting result for you. In the world, which is made by oneself .

✣✣✣✣✣✣✣✣✣✣✣✣✣✣***❀***✣✣✣✣✣✣✣✣✣✣✣✣✣

यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने ।
तदाज्यभागावन्तरेणाहुतीः प्रतिपादयेत् ॥२ ॥

•अन्वयः

यदा(यस्मिन् काले ), हव्यवाहने (अग्नौ), समिद्धे (इन्धनैः सम्यक् प्रज्वलिते ),अर्चिः (अग्निशिखा) लेलायते (चलति ), तदा (तस्मिन् काले),आज्यभागौ (आज्यभागस्थानयोः), अन्तरेण (मध्ये), आहुतीः प्रतिपादयेत्(प्रक्षिपेत्)।

यदा......................indeclinable
(यत् काले दाच् )
when

लेलायते.................(ad.) लेलाय (M.)loc.sing.
लेलाय -नामधातु (लेला-क्यच् -शतृ ) लेलाम् इव आचरति
blaze

हि.......................indeclinable
indeed

अर्चिः...................अर्चिः (F.)nom.sing.
(अर्च्- इन्) अर्च्-to worship 1P
a fire

समिद्धे...................(ad.) समिद्धः(M.)loc.sing.
(सम्-इन्ध्-क्त) इन्ध्..to shine 7A
in well lightet

हव्यवाहने................(ad.) हव्यवाहनः (M.)loc.sing.
हव्यं वहति--हव्यवाहनः
one who carried away oblations-A fire

तदा......................indeclenable
(तत् काले दाच् )
at that time

आज्यभागौ...............छान्दसम् आज्यभागयोः (ad.) आज्यभागः (M.) loc.dual
(आज्यस्य भागः- आज्यभागः )(6TP)
between two oblations

अन्तरेण.................indeclinable
(अन्तर्-इण-ण)
in between



Download from www.arshaavinash.in

आहुतीः……………..आहुतिः (F.)nom.pl.
(आ-हु-क्तिन् )
oblations
प्रतिपादयेत्…………प्रति-पद् 3rd.per.sing. pot.mood.विधि-लिङ्
प्रति-पद्-- to approach 4A Anit (causal)
one should made to offer
When fire being set ablaze properly ,at that time oblations should made to offer in between parts.

यस्याग्निहोत्रमदर्शमपौर्णमास-
मचातुर्मास्यमनाग्रयणमतिथिवर्जितं च ।
अहुतमवैश्वदेवमविधिना हुत-
मासप्तमांस्तस्य लोकान्हिनस्ति ॥ ३ ॥

•अन्वयः
यस्य (अग्निहोत्रिणः ),(यः अग्निहोत्री),अग्निहोत्रं (सायंप्रातः आहुतिरुपं कर्म ),अदर्शं (दर्शाख्यकर्म रहितं),अपौर्णमासं (पौर्णमासकर्मरहितं ), अचातुर्मास्यं ( अचातुर्मास्यकर्मणावर्जितं ),अनाग्रयणं (कर्मरहितं ), अतिथिवर्जितं (कर्म ), अहुतं(अग्निहोत्रकाले न सम्यक् हुतं ), अवैश्वदेवं (कर्महीनं ), अविधिना हुतं (शास्त्रविधि-अनुसारेण न कृतम्), (करोति..),तस्य (अग्निहोत्रिणः ), आसप्तमान् (भूः-आदि) लोकान् , हिनस्ति(नाशयति इव आयसमात्र फलत्वात् ) ।
यस्य……………….(re.pro.) यत् (N.)gen.sing.
of him
अग्निहोत्रम्………….अग्निहोत्रिन् (M.)acc.sing.
यः अग्निहोत्रं करोति सः-
one who does Agnihotra (fire ritual )
अदर्शम्………………(ad.) अदर्शः (M.) acc.sing.
न दर्शम्- अदर्शम् (NTP) (दृश्- घञ् ) (दर्शयागः- sacrifice does on fortnight)
without Darsa

अपौर्णमासम्………..अपौर्णमासः (M.) acc.sing.
( न पौर्णमासः - अपौर्णमासः )(NTP) (पौर्णमासः- sacrifice does on fullmoon )
without Paurnamasa
अचातुर्मास्यम्……….(ad.) अचातुर्मास्यः (M.)acc.sing.
न चातुर्मास्यम्- अचातुर्मास्यम् (चतुर्मास्-ण्य)
without Caturmasya ritual
अनाग्रयणम्………….(ad.) अनाग्रयणः (M.)acc.sing.
न अग्रायणः -अनाग्रयणः (NTP)
Agrayana ritual which is not done(which is to be undertaken in the autumn and spring)
अतिथिवर्जितम्………(ad.) अतिथिवर्जित (M.)acc.sing.
अतिथेः वर्जितः - अतिथिवर्जितः (6TP) (अतति गच्छति न तिष्ठति- अतिथिः)



Download from www.arshaavinash.in

(अत्-इथिन्) (वृज्-क्त) अत्- to go 1P, वृज्-to avoid 2A,7P,10U
guests are not served

अहुतम्....................(ad.) अहुत (M.)acc.sing.
न हुतम् -अहुतम् (NTP) (हु-क्त) हु- to offer 3P
not performed

अविधिना.................(ad.) अविधिः (M.)inst.sing.
न विधिः - अविधिः (NTP ) (वि-धा-कि) धा- to put 3U
not by proper way/ unduly

आसप्तमान्................आसप्तमः (M.)acc.pl.
(आ-सप्तमः)
including seven

लोकान्..................लोकः (M.) acc.pl.
(लोक्-घञ्)(लोक्यते असौ) लोक्-to experience 1A
worlds (भूः,भुवः,सुवः,महः,जनः,तपः,सत्यम् )

तस्य.....................(demo.pro.) तत् (M.) gene.sing.
of that

हिनस्ति.................हिस् 3rd.per.sing. pre.ten. लट्
हिस्--to injure 7P Anit
he destroys

An Angihotri one whose Angihotram;a ritual which is offered everyday morning and evening is without Darsa and Paurnamasa, devoid of Caturmasya, bereft of Agrayana, guests are not served, it is not offered at proper time, is unaccomplished by Vaisdeva rite and not performed properly. For that person seven worlds are destr ed, mere fruit is the trouble undergone.

✤✣✣✣✣✣✣✣✣✣✣✣✣✣✣***❀***✣✣✣✣✣✣✣✣✣✣✣✣✤

काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा ।
स्फुलिङ्गि नी विश्वरुची च देवी
लेलायमाना इति सप्त जिह्वाः ॥ ४ ॥

•अन्वयः
(अग्नेः आहुतिग्रसनार्था एताः), काली, कराली,मनोजवा,सुलोहिता, सुधुम्रवर्णा,
स्फुलिङ्गि नी, विश्वरुची च लेलायमानाः(प्रदिप्ताः), सप्त जिह्वाः ।देवी विश्वरुच्याः विशेषणम्।

काली....................काली (F.) nom.sing.
Kali (black)

कराली..................कराली (F.) nom.sing.
Karali (terrible)



Download from www.arshaavinash.in

मनोजवा……………मनोजवा (F.) nom.sing.
मनसः इव जवः वेगः यस्याः सा
Manojava (fast)
सुलोहिता……………सुलोहिता(F.) nom.sing.
(सु-रुह्-इतन्-टाप् रस्य लः)
Solohita (very red )
या…………………..(re.pro.) यत् (F.) nom.sing.
which
सुधूम्रवर्णा……………सुधूम्रवर्णा (F.) nom.sing.
(सु-धूम्र-रा-क )(वर्ण्-घञ्)
सुष्ठु धूम्रवर्णा यस्याः सा- सुधूम्रवर्णा
Sudumravarna (colour with smoke )
स्फुलिङ्गिनी………..स्फुलिङ्गिनी (F.) nom.sing.
(स्फुल्-इङ्गक्-ङीप्)
Sphulingi (emitting sparks)
विश्वरुची…………….विश्वरिची (F.) nom.sing.
(विश्-व )(रुच्-कि)
Visvaruci (goes in all directions )
देवी…………………देवी (F.) nom.sing.
(दिव्-अच्-ङीप्)
Devi (shining)
लेलायमानाः………..(ad.) लेलायमाना (F.) nom.pl.
(लेला-क्यङ्-शानच् ) pre.act.part. of नामधातु
flaming
सप्तजिह्वाः……………(ad.) सप्तजिह्वा (F.) nom.pl.
सप्त च जिह्वाः च -सप्तजिह्वा (द्वन्द स.)
Seven tongues

These Kali,Karali,Manojava,Sulohita,Sudumravarna,Sphulingini and Visvaruci are the seven flaming tongues of fire for receiving of oblations.Devi is an adjective of Visvaruci.

✤✣✣✣✣✣✣✣✣✣✣✣✣✣✣✣***❀***✣✣✣✣✣✣✣✣✣✣✣✣✣✤

एतेषु यश्चरते भ्राजमानेषु
यथाकालं चाहुतयो ह्याददायन् ।
तं नयन्त्येताः सूर्यस्य रश्मयो
यत्र देवानां पतिरेकोऽधिवासः ॥ ५ ॥

- अन्वयः

यथाकालं (सम्यक् कालं, कालं अनतिक्रम्य), यः (अग्निहोत्री) , एतेषु भ्राजमानेषु (लेलायमानेषु जिह्वासु), चरते (= चरति



Download from www.arshaavinash.in

अग्निहोत्रादिकं  कर्म  करोति), च आहुतयः हि आददायन् (=आददानाः,अग्निहोत्रिणा निर्वर्तिताः ) ।एताः आददानाः, अग्निहोत्रिणा  निर्वर्तिताः आहुतयः ),सूर्यस्य रश्मयः(भूत्वा), तम् (अग्निहोत्रिम्),  नयन्ति(आगमयन्ति)।(कुत्र ?) यत्र(यस्मिन्स्थाने), देवानां पतिः(इन्द्रः) एकः अधिवासः(सर्वानुपरि अधि वसति)।

एतेषु………………(demo.pro.)  एतद् (M.) loc.pl.
(इ-अदि-तुँ क्)
these

यः…………………(rel.pro)  यद् (M.)nom.pl.
(यज्-अदि  ङित्)
who

चरते………………छान्दसम् -चरति  चर्  3rd per.sing.  A.P. Pre.ten.लट्
चर्- to move  1P.P. set
contextually- performs

भ्राजमानेषु…………(ad.)  भ्राजमान(M.)loc.pl.
(भ्राज्-शानच्) pre.act.part.  भ्राज्-to shine 1A
in the shining

यथाकालम्…………indeclinable
(कालम् अनतिक्रम्य-  अव्य.स.)
at  a proper time

आहुतयः……………आहुतिः(F.)nom.pl.
(आ-ह्वे-क्तिन्)  ह्वे-to invoke 1U Anit
oblations

हि……………………indeclinable
indeed

आददायन्……………छान्दसम् आददानाः……आददायन् (F.)nom.pl.
(आ-दा-शानच्)
receiving

तम्…………………(demo.pro.)  तत्  (M.)acc.sing.
to that

नयन्ति………………नी  3rd.per.pl.pre.ten.लट्
नी- to take 1P anit
they take

एताः………………(demo.pro.)  एतद् (F.)nom.pl.
(इ-अदि-तुँ क्)
these

सूर्यस्य……………सूर्यः (M.)gen.sing.
(सृ-क्यप्)  सृ- to go  1P Anit
of the sun



Download from www.arshaavinash.in

रश्मयः.................रश्मिः (F.) nom.pl.
(अश्-मि धातारुट् or रश् -मि) रश्- to sound 1P set
the rays
यत्र.......................indeclinable
(यत्-तसिल्)
in which (in built locative meaning)
देवानाम्................. देवः (M.) gen.pl.
(दिव्-अच्) दिव्-to shine 4P anit
of the devatas
पतिः...................पतिः(M.)nom.sing.
(पाति रक्षति-) (पा-इति)
the lord
अधिवासः.............अधिवासः(M.)nom.sing.
(अधि-वस्-णिच्-घञ्) वस्-to dwell 1P set
dwelling
One who does Anihotradi Karma and etc., at proper time in these bright flames.Receiveing oblations are accomplished by Anihotri.These oblations having turned into the rays of the sun and they lead him.The place in which the single lord of gods who incharged of all.

एह्येहीति तमाहुतयः सुवर्चसः
सूर्यस्य रश्मिभुर्यजमानं वहन्ति ।
प्रियां वाचमभिवदन्त्योऽर्चयन्त्य
एष वः पुण्यः सुकृतो ब्रह्मलोकः ॥६ ॥

•अन्वयः

सुवर्चसः(दीप्तिमत्यः) आहुतयः,'एहि एहि(आगच्छ आगच्छ)' इति (उक्त्वा),सूर्यस्य रश्मिभिः,तम् यजमानम् (अग्निहोत्रं सदृशं कर्मिणम्) वहन्ति(स्वर्गं प्रापयन्ति )।अभिवदन्त्यः, अर्चयन्त्यः (दीप्तिमत्यः आहुतयः),'एषः वः(युष्माकं) पुण्यः सुकृतः ब्रह्मलोकः(प्रकरणात् स्वर्गलोकः)'-(एवं),प्रियां वाचं (उक्त्वा),(तम् यजमानं वहन्ति इति शेषः ) ।
एहि....................आ-इ 2nd.per.sing. Imp.mood. लोट्
आ-इ - to come 2P Anit
come
इति....................indeclinable
(इ-क्तिन्)
used to report words which are spoken
तम्....................(demo.pro.) तत् (M.)acc.sing.
to that
आहुतयः................आहुतिः(F.)nom.pl.
(आ-ह्वे-क्तिन्) ह्वे-to invoke 1U Anit
oblations



Download from www.arshaavinash.in

सुवर्चसः................छान्दसम् - सुवर्चांसिं (ad.) सुवर्चस् (F.) nom.pl.
सुष्ठु वर्चसः यस्याः सा (वर्च्- असुन्) वर्च्- to shine 1A set
sparkling, scintillating

सूर्यस्य.................सूर्यः (M.)gen.sing.
(सृ-क्यप्) सृ- to go 1P Anit
of the sun

रश्मिभिः................रश्मिः (F.) instr.sing.
(अश्-मि धातारुट् or रश् -मि) रश्- to sound 1P set
along with the rays

यजमानम्..............यजमानः (M.)acc.sing.
(यज्- शानच् ) यज्-to sacrifice 1U Anit
to one who does sacrifice

वहन्ति.................वह् 3rd.per.pl. pre.ten. लट्
वह्- to carry 1P set
they carry

प्रियाम्.................प्रिया (F.)acc.sing.
(प्री-क-टाप्) प्री-to be satisfied 4A Anit
pleasing

वाचम्..................वाक् (F.)acc.sin.
(वच्-क्विप् दीर्घः असम्प्रसारणम्) वच्- to speak 2P Anit
word

अभिवदन्त्यः...........(ad.) अभिवदन्ती(F.)nom.pl.
अभि-वद्-शतृ-ङीष् वद्-to speak 1P set
uttering

अर्चयन्त्यः.............(ad.) अर्चयन्ती (F.)nom.pl.
अर्च-णिच्-शतृ-ङीष् अर्च -to worship 10U set
offering

एषः.....................(demo.pro.) एतत् (M.)nom.sing.
(इ-अदि-तुँ क्)
this

वः......................short form of युष्माकम् (per.pro.) युष्मद् gen.pl.
(युष्-मदिक् ) युष्-to injure 1P set
your

पूण्यः...................पूण्यः (M.)nom.sing.
(पू-यण्- णुक्, ह्रस्वः) पू-to purify 9U set
virtuous



Download from www.arshaavinash.in

सुकृतः………………(ad.)　　सुकृतः (M.) nom.sing.
सुष्ठु कृतम् कर्म　(सु-कृ-क्त)　　कृ-to do 8U Anit
well earned
ब्रह्मलोकः……………(ad.)　　ब्रह्मलोकः (M.) nom.sing.
ब्रह्मणः लोकः- 6TP
(बृह्-मनिन्) (लोक्-घञ्)　　बृह्- to grow 1P set , लोक्-to experience 1A set
contextually-Heaven

Sparkling oblations having said,"come,come", make that sacrificer to reach to heaven along with the rays of Sun.Uttering sparking oblations,'this is your virtuos,well earned heaven",having said pleasing words they make that sacrificer to reach to heaven along with the rays of Sun.

✤✣✣✣✣✣✣✣✣✣✣✣✣✣✣***❀***✣✣✣✣✣✣✣✣✣✣✣✣✣✤

प्लवा ह्येते अदृढा यज्ञरुपा
अष्टादशोक्तमवरं येषु कर्म ।
एतच्छ्रेयो येऽभिनन्दन्ति मूढा
जरामृत्युं ते पुनरेवापि यन्ति ॥७॥

•अन्वयः

यज्ञरुपाः(यैः यज्ञः निर्वत्यते = यज्ञकर्तारः), एते प्लवाः(तृणकाष्ठादिभिः निर्मिताः),हि (यस्मात्), अदृढाः (स्वल्प विघ्ने न अपि प्रतिहताः),के ते (यज्ञरुपाः=यज्ञकर्तारः?)अष्टदशः(षोडश-ऋत्विजः, भार्या,यजमानः),येषु(अष्टदशसु षोडशऋत्विजभार्यायजमानेषु), उक्तं अवरं (अग्निहोत्रादि उपासना वर्जितम् कर्म) वर्तते।ये मूढाः एतत् (उपासना रहितं कर्म), श्रेयः(इति मत्वा), अभिनन्दति(हर्षं प्राप्नुवन्ति)।ते (मूढाः), जरामृत्युं(संसारं), पुनः एव अपियन्ति ।

प्लवाः…………………प्लवः (M.)nom.pl.
(प्लु-अच्)　　प्लु- to go 1A anit
contextually –flimsy
हि……………………indeclinable
because of
अदृढाः………………(ad.)　　अदृढः (M.)nom.pl.
न दृढः - नञ् त.पु. (दृह्- क्त)　　दृह्-to be fixed or firm 1P set
fragile
यज्ञरुपाः……………यज्ञरुपः (M.)nom.pl.
(यज्ञः रुप्यते निरुप्यते )(कर्मणि व्युत्पति)
sacrifice accomplished by whom=Accomplishers of sacrifice
अष्टादशः……………अष्टादशः nom.pl.(same in all gender)
eighteen
उक्तम्………………(ad.)　　उक्तम्(N.)nom.sing.
(वच् -क्त )　　वच्-to say 2p Anit
has been said



Download from www.arshaavinash.in

अवरम्……………..(ad.)        अवरम् (N.)nom.sing.
(न वरम् -नञ् त.पु.) (वृ-कर्मणि अप्)        वृ-to select 9A set
inferior
येषु…………………(rel.pro.)      यत् (M.)loc.pl.
on whom
कर्म…………………कर्म  (N.)nom.sing.
(कृ-मनिन् )
Karma
एतत्………………..(demo.pro.)     एतत् (N.)nom.sing.
this
श्रेयः…………………श्रेयः (N.)nom.sing.
अतिशये न प्रशस्यम् , (प्र-शंस्-इयसुन्)        शंस्-  to praise 1PAnit
most  exalted
ये……………………(rel.pro.)      यत् (M.)nom.pl.
those  who
अभिनन्दति…………अभि-नन्द्  3rd.per.pl.pre.ten.लट्
अभि-नन्द्-  to rejoice 1P  set
they  get elated
मूढाः…………………(ad.)        मूढः( M.)nom.sing.
(मुह्-क्त)        मुह्-to err 4P vet
deluded,ignorant people
जरामृत्यम्……………छान्दसम् -जरामृत्यू        (ad.)   जरामृत्युः (N.)acc.sing.
जरा च मृत्युः च -जरामृत्यू (इत.द्वन्द) (जॄ-अङ्-टाप्)(मृ-त्युक्)
old age  and death
ते……………………(rel.pro.)        तत् (M.)nom.pl.
those
पुनर्…………………indeclinable
(पन्-अर्-उत्वम्)
again
एव…………………indeclinable
indeed
अपियन्ति………….अपि-इ    3rd.per.pl.pre.ten. लट्
अपि-इ-  to gain  2P Anit
they  get

Constituents of a sacrifice are flimpsy and fragile, because even by little obstacle they are perished. Who are those? A Karma which is devoid of *upasana* is inferior has been said to rest with reference to sixteen priests, sacrificer and his wife.These deluded people having thaught this karma is good, they got elation. Those people   undergo old age and death over again.



Download from www.arshaavinash.in

अविद्यायामन्तरे वर्तमानाः

स्वयं धीराः पण्डितंमन्यमानाः ।

जङ्घन्यमानाः परियन्ति मूढाः

अन्धेनैव नीयमाना यथान्धाः ॥८ ॥

•अन्वयः

अविद्यायां अन्तरे (मध्ये), वर्तमानाः(अविवेकप्रायाः), स्वयं (वयं एव)धीराः पण्डितं मन्यमानाः( विदितं आत्मानं सम्भावयन्तः)। मूढाः(विवेकशून्याः), जङ्घन्यमानाः(जरा-रोगादि अनेक-अनर्थ-व्रातैः हन्यमानाः),परियन्ति(विभ्रमन्ति- संसारचक्रे पुनः पुनः विभ्रमन्ति)।यथा, अन्धाः(नेत्रहीनापुरुषाः), अन्धेन एव नीयमानाः(प्रदर्श्यमानमार्गाः प्राप्यमाणाः)(लोके,अन्धाः,गर्तकण्टकादौ पतन्ति, तथा मूढाः जन्ममरणादिदुखम् प्राप्नुवन्ति)।

अविद्यायाम्.............(ad.) अविद्या(F.)loc.sing.

न विद्या - अविद्या (नञ् तत्पु.) (विद्-क्यप्) विद्-to know 2P Set

in the ignorance

अन्तरे..................(ad.) अन्तरः(M.)loc.sing.

अन्तं राति ददाति, रा-क

being in the inside

वर्तमानाः.................(ad.) वर्तमानः (M.)nom.pl.

(वर्त्-मुक्-शानच् ) वर्त्-to be 1A Set

remaining

स्वयम्....................indeclinable

(सु-अय्-अम्)

oneself

धीराः....................धीरः (M.)nom.pl.

(धी-रा-क )

wise-men

पण्डितम्.............. पण्डितः (M.)acc.pl.

(पण्डा अस्य अस्ति-पण्डितः) (पण्डा-इतच्)

learned

मन्यमानाः............... (ad.) मन्यमानाः(M.)nom.pl.

(मन्-यक्-मुक्-शानच्) (pre.pas.part) मन्- to think 4A Anit

being thaught

जङ्घन्यमानाः............(ad.) जङ्घन्यमानः (M.) nom.pl. (pre.pas.part)

(हन्-यङ्-यक्-शानच् )frequantative-यङ् हन्-to kill 2P Anit

being buffeted

परियन्ति..............परि-इ 3rd.per.pl. pre.ten.लट्

परि-इ-to go round 2P Anit

go round



Download from www.arshaavinash.in

मूढाः…………………(ad.)　　　　मूढः(M.)nom.pl.
(मुह्-क्त )　　　　　　　　　मुह्-to be deluded 4P Anit
fools, deluded
अन्धेन……………..अन्धः (M.)instr.sing.
(अन्ध्-अच्)　　　　　　　　　अन्ध्-to be blind 10U set
by the blind
एव…………………..indeclinable
indeed
